# Shri Bala Kavacham 3

# શ્રીબાલાકવચમ્ ૩

## Document Information

Text title : Shri Bala Kavacham 3

File name : bAlAkavacham3.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીબાલાકવચમ્ ૩

અસ્ય શ્રીબાલાત્રિપુરસુન્દરીકવચસ્તોત્રમહામન્ત્રસ્ય દક્ષિણામૂર્તિઃ
ઋષિઃ । પઙ્ક્તિશ્છન્દઃ । બાલાત્રિપુરસુન્દરી દેવતા । ઐં બીજમ્ ।
ક્લીં શક્તિઃ સૌઃ કીલકમ્ । જપે વિનિયોગઃ । મૂલેન કરાઙ્ગ ન્યાસૌ ।
દિગ્બન્ધઃ ધ્યાનં - ઐઙ્કારાસન ઇત્યાદિ સઞ્ચારિણીમ્ ॥ લમિત્યાદિ ।

મન્દિરે સુખમાસીનં ભૈરવં ચન્દ્રશેખરમ્ ।
બદ્ધાઞ્જલિર્નમસ્કૃત્ય પરિપપ્રચ્છ પાર્વતી ॥ ૧॥

યદિ પ્રસન્નો દેવેશ યદિવાઽનુગ્રહો મયિ ।
બાલાયાઃ કવચં બ્રૂહિ સદા કલ્યાણસૌખ્યદમ્ ॥ ૨॥

શિવ ઉવાચ -
સાધુ સાધુ મહેશાનિ સમ્યક્સમ્યક્ચ્ય પૃચ્છસિ ।
યત્પ્રસાદાન્મહેશાનિ લસત્ત્રૈલોક્યમુત્તમમ્ ॥ ૩॥

તતશ્ચરાચરં વિશ્વં યતો બ્રહ્માદયોઽમરાઃ ।
યદ્ભ્રૂવિલાસવત્પ્રીત્યા સિદ્ધયસ્ત્વણિમાદયઃ ॥ ૪॥

તદ્બાલાપરમેશ્વર્યાઃ કવચં સર્વસિદ્ધિદમ્ ॥

કથયિષ્યે શ ૃણુષ્વ ત્વં સર્વસૌભાગ્યકારકમ્ ॥ ૫॥

શિરો રક્ષતુ મે બાલા લલાટે પાતુ સુન્દરી ।
કર્ણૌ શ્રીઃ સર્વદા પાતુ નેત્રે કમલવાસિની ॥ ૬॥

ઓષ્ઠમધ્યે વિશાલાક્ષી જિહ્વાં પાતુ સરસ્વતી ।
મુખં મનોરમા પાતુ ચિબુકં મે ત્વચઞ્ચલા ॥ ૭॥

કણ્ઠં શ્રીકાલિકા પાતુ બાહૂ રક્ષતુ ચણ્ડિકા ।
કરૌ ષડક્ષરી પાતુ હૃદયં હરિવલ્લભા ॥ ૮॥

માતઙ્ગી પાતુ મે મધ્યં ભવાની જઠરં મમ ।

નાભિં શ્રીભૈરવી પાતુ ગુહ્યં કામેશ્વરી તથા ॥ ૯॥

કટિં પાયાત્કામધાત્રી જાનુની જગદીશ્વરી ।
જઙ્ઘે મે ત્વરિતા પાતુ જઙ્ઘપાશ્વેઽશ્વવાહિની ॥ ૧૦॥

પર્વતસ્થા પાતુ પાદૌ અઙ્ગુલી ભૂમિવાસિની ।
અગ્રતસ્ત્રિપુરા પાતુ પૃષ્ઠતો મમ ભૈરવી ॥ ૧૧॥

દક્ષિણે સુન્દરી પાતુ વામે મઙ્ગલદાયિની ।
ઊર્ધ્વં જ્યોતિષ્મતી શક્તિઃ અધોઽનન્તસ્વરૂપિણી ॥ ૧૨॥

સર્વશત્રુહરા દુર્ગા પાતુ મે વિજયા રણે ।
ગૃહં રક્ષેદ્ભદ્રકાલી વાચં વાગ્વાદિની મમ ॥ ૧૩॥

ઓષ્ઠૌ મે માતૃકાઃ સર્વાઃ સર્વકાર્યેષુ સર્વદા ।
ઇત્યેતત્કવચં પ્રોક્તં યઃ પઠેત્સુસમાહિતઃ ॥ ૧૪॥

દિવા વા યદિ વા રાત્રૌ ત્રિસન્ધ્યં ભક્તિમાન્નરઃ ।
જ્ઞાત્વૈતત્કવચં પુણ્યં સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૫॥

ઇતિ શ્રીબાલાકવચં (૩) સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Kavacham 3*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*